## पञ्चम: अनुच्छेद:

संस्कृतभाषा प्राचीनभाषासु एकतमा । वेदा: विश्वस्य प्राचीनतमा: उपलब्धा: ग्रन्था: । एते संस्कृत-भाषायामेव सन्ति । अस्माकं संस्कृति: संस्कृतमाश्रिता । कथितमस्ति संस्कृतं विना संस्कृति: पङ्गु: । संस्कृतिं विना ज्ञानिजन: अन्ध: । संस्कृतभाषा अनेकासां भाषाणां जननी । पालि-प्राकृत-अपभ्रंशप्रभृतय: भाषा: संस्कृतभाषया एव विकसिता: । आधुनिक-भारतीयभाषाणां विकास: संस्कृतभाषया एव भवति । संस्कृते नूतनशब्दानां निर्माणे अनुपमा क्षमता विद्यते । आधुनिकभाषाणां शब्दकोशस्य संवर्धनाय संस्कृतस्य ज्ञानमनिवार्यम् । देशे भावात्मक-ऐक्याय संस्कृतं परमावश्यकम् । संस्कृतशिक्षाविषये श्रीमाता कथयति- शिक्षाया: माध्यमं स्यात् मातृभाषा राष्ट्रभाषा भवेत् सरलं संस्कृतम् । अन्ताराष्ट्रियभाषा तु स्यात् संप्रति आङ्गलभाषा ।

### प्रश्ना:

**1. एकेन वाक्येन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

(क) शिक्षाया: माध्यमं किं भवेत् - इति श्रीमाता कथितवती ?

(ख) संस्कृतभाषया का: भाषा: विकसिता: ?

(ग) आधुनिकभारतीयभाषाणां विकास: कया भाषया भवति ?

**2. एकेन पदेन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

(क) वेदा: कस्यां भाषायां सन्ति ?

(ख) संस्कृतं विना का पङ्गु ?

(ग) अनेकासां भाषाणां जननी का ?

(घ) किमर्थं संस्कृतं परमावश्यकम् ?